॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

# स्वामि चिन्मयानन्द स्तुति

ध्यायामि चिन्मयानन्दं गुरुदेवं महामतिम् |
प्रेमपूर्णं क्रियाशीलं सदा लोकहितेरतम् || १ ||

कृपालुं सुन्दराकारं समर्थं सत्यदर्शीनं |
वाचा तत्वप्रकाशिन्या शोकमोह विनाशिनम् || २ ||

सत्यानन्दस्वरूपाय बोधैकसुखकारिणे |
नमो वेदान्त वेद्याय गुरवे बुद्धिसाक्षिणे || ३ ||

नित्यं शुद्धं निराभासं निराकारं निरञ्जनम् |
नित्यबोधं चिदानन्दं गुरुं ब्रह्म नमाम्यहं || ४ ||

निरस्त सर्व संदेहम् एकीकृत सुदर्शनम् |
यो दर्शयति रहस्यम् भजामि गुरुमीश्वरम् || ५ ||

वन्देऽहं सच्चिदानन्दं भावातीतं जगद्गुरुम् |
नित्यं पूर्णं निराकारं निर्गुणं स्वात्मसंस्तिथम् || ६ ||

नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च |
अचिन्त्यायाप्रमेयाय अनादिनिधनाय च || ७ ||

समस्त जनकल्याणे निरतं करुणामयम् |
नमामि चिन्मयं देवं सद्गुरुं ब्रह्मविद्वरम् || ८ ||

ॐ शान्तिः शान्तिः शान्तिः ||

|| हरिः ॐ ||


©swaadhyaayee@gmail.com

|| ṣrī gurubhyō namaḥ | hariḥ Om ||

# swāmi cinmayānanda stuti

dhyāyāmi cinmayānandam gurudevam mahāmatim |
premapūrṇam kriyāṣīlam sadā lōkahitēratam || 1 ||

krpālum sundarākāram samartham satyadarṣinam |
vācā tatvaprakāṣinyā ṣōkamōha vināṣinam || 2 ||

satyānanda-svarūpāya bodhaikasukhakāriṇē |
namō vēdānta vēdyāya guravē buddhisākṣiṇē || 3 ||

nityam ṣhuddham nirābhāsam nirākāram niranjanam |
nityabōdham cidānandam gurum brahma namāmyaham || 4 ||

nirasta sarva-sandēham ēkikruta sudarṣanam |
yō darṣayati rahasyam bhajāmi gurumīṣvaram || 5 ||

vandēham saccidānandam bhāvātītam jagadgurum |
nityam pūrṇam nirākāram nirguṇam svātmasamsthitam || 6 ||

namah ṣāntātmane tubhyam namō guhyatamāya ca |
acintyāya-apramēyāya anādinidhanāya ca || 7 ||

samasta janakalyāṇe niratam karuṇāmayam |
namāmi cinmayam devam sadgurum brahma vidvaram || 8 ||

Om ṣāntiḥ ṣāntiḥ ṣāntiḥ ||

|| hariḥ Om ||


©swaadhyaayee@gmail.com